# श्री सुब्रह्मण्य भुजङ्ग स्तोत्रम्

सदा बालरूपापि विघ्नाद्रि हन्त्री,
महादन्ति वक्त्रापि पञ्चास्य मान्या ।
विधीन्द्रादि मृग्या गणेशाभिधा मे
विधत्तां श्रियं कापि कल्याणमूर्तिः ॥ १ ॥

न जानामि शब्दं न जानामि चार्थं
न जानामि पद्यं न जानामि गद्यम् ।
चिदेका षडास्या हृदि द्योततेमे
मुखान्निः सरन्ते गिरश्चापि चित्रम् ॥ २ ॥

मयूराधि रूढं महावाक्य गूढं
मनोहारि देहं महच्चित्त गेहम् ।
महीदेवदेवं महावेद भावं
महादेव बालं भजे लोकपालम् ॥ ३ ॥

यदा संनिधानं गता मानवा मे
भवाम्भोधि पारं गतास्ते तदैव ।
इति व्यञ्जयन्सिन्धु तीरे य आस्ते
तमीडे पवित्रं पराशक्ति पुत्रम् ॥ ४ ॥

यथाब्धेस् तरङ्गा लयं यान्ति तुङ्गाः
तथैवापदः संनिधौ सेवतां मे ।
इतीवोर्मि पङ्क्तीर् नृणां दर्शयन्तं
सदा भावये हृत्सरोजे गुहंतम् ॥ ५ ॥

गिरौ मन्निवासे नराये ऽधिरूढाः
तदा पर्वते राजते तेऽधिरूढाः ।
इतीव ब्रुवन्गान्ध शैलाधिरूढः
स देवो मुदे मे सदा षण्मुखोऽस्तु ॥ ६ ॥

महाम्भोधि तीरे महापाप चोरे
मुनीन्द्रानुकूले सुगन्धाख्य शैले ।
गुहायां वसन्तं स्वभासा लसन्तं
जनार्तिं हरन्तं श्रयामो गुहं तम् ॥ ७ ॥

लसत् स्वर्ण गेहे नृणां कामदोहे
सुमस्तोम सञ्छन्न माणिक्य मञ्चे ।
समुद्यत् सहस्रार्क तुल्य प्रकाशं
सदा भावये कार्तिकेयं सुरेशम् ॥ ८ ॥

रणद्धंसके मञ्जुलेत्यन्त शोणे
मनोहारि लावण्य पीयूष पूर्णे ।

मनः षट्पदो मे भवक्लेश तप्तः
सदा मोदतां स्कन्द ते पादपद्मे ॥ ९ ॥

सुवर्णाभ दिव्याम्बरैर् भासमानां
क्वणत्किङ्किणी मेखला शोभमानाम् ।
लसद्धेम पट्टेन विद्योतमानां
कटिं भावये स्कन्द ते दीप्यमानाम् ॥ १० ॥

पुलिन्देश कन्या घना भोग तुङ्ग-
स्तनालिङ्ग नासक्त काश्मीर रागम् ।
नमस्याम्यहं तारकारे तवोरः
स्वभक्तावने सर्वदा सानुरागम् ॥ ११ ॥

विधौ क्लुप्त दण्डान् स्वलीला धृताण्डान्
निरस्तेभ शुण्डान् द्विषत्काल दण्डान् ।
हतेन्द्रारि षण्डान् जगत्राण शौण्डान्
सदा ते प्रचण्डान् श्रये बाहु दण्डान् ॥ १२ ॥

सदा शारदाः षण्मृगाङ्का यदि स्युः
समुद्यन्त एव स्थिताश्चेत् समन्तात् ।
सदा पूर्णबिम्बाः कलङ्कैश्च हीनाः
तदा त्वन्मुखानां ब्रुवे स्कन्द साम्यम् ॥ १३ ॥

स्फुरन् मन्दहासैः सहंसानि चञ्चत्-
कटाक्षावली भृङ्ग सङ्घोज्ज्वलानि ।
सुधा स्यन्दि बिम्बाध राणीश सूनो
तवालोकये षण्मुखाम्भोरु हाणि ॥ १४ ॥

विशालेषु कर्णान्त दीर्घेष्वजस्रं
दयास्यन्दिषु द्वादश स्वीक्षणेषु ।
मयीषत् कटाक्षः सकृत् पातितश्चेत्
भवेत्ते दयाशील का नाम हानिः ॥ १५ ॥

सुताङ्गोद्भवो मेऽसि जीवेति षड्धा
जपन् मन्त्र मीशो मुदा जिघ्रतेयान् ।
जगद्भार भृद्भ्यो जगन्नाथ तेभ्यः
किरीटोज्ज्वलेभ्यो नमो मस्तकेभ्यः ॥ १६ ॥

स्फुरद् रत्न केयूर हाराभिरामः
चलत् कुण्डलश्री लसद्गण्ड भागः ।
कटौ पीतवासाः करे चारु शक्तिः
पुरस्तान् ममास्तां पुरारे स्तनूजः ॥ १७ ॥

इहायाहि वत्सेति हस्तान् प्रसार्या-
-ह्वयत्याद राच्छङ्करे मातुरङ्कात् ।
समुत्पत्य तातं श्रयन्तं कुमारं
हराश्लिष्ट गात्रं भजे बालमूर्तिम् ॥ १८ ॥

कुमारेश सूनो गुह स्कन्द सेना-
-पते शक्तिपाणे मयूराधिरूढ ।
पुलिन्दात्मजा कान्त भक्तार्ति हारिन्
प्रभो तारकारे सदा रक्ष मां त्वम् ॥ १९ ॥

प्रशान्तेन्द्रिये नष्ट सञ्ज्ञे विचेष्टे
कफोद्गारि वक्त्रे भयोत्कम्पि गात्रे ।
प्रयाणोन् मुखे मय्यनाथे तदानीं
द्रुतं मे दयालो भवाग्रे गुह त्वम् ॥ २० ॥

कृतान्तस्य दूतेषु चण्डेषु कोपात्
-दहच्छिन्द्धि भिन्द्धीति मां तर्जयत्सु ।
मयूरं समारुह्य मा भैरिति त्वं
पुरः शक्तिपाणिर् ममायाहि शीघ्रम् ॥ २१ ॥

प्रणम्या सकृत्पादयोस्ते पतित्वा
प्रसाद्य प्रभो प्रार्थयेऽनेक वारम् ।

न वक्तुं क्षमोऽहं तदानीं कृपाब्धे
न कार्यान्तकाले मनागप्युपेक्षा ॥ २२ ॥

सहस्राण्ड भोक्ता त्वया शूरनामा
हतस्तारकः सिंह वक्त्रश्च दैत्यः ।
ममान्तर् हृदिस्थं मनःक्लेश मेकं
न हंसि प्रभो किं करोमि क्वयामि ॥ २३ ॥

अहं सर्वदा दुःख भारा वसन्नो
भवान् दीन बन्धुस्त्वदन्यं न याचे ।
भवद् भक्ति रोधं सदा क्लप्त बाधं
ममाधिं द्रुतं नाशयोमासु तत्वम् ॥ २४ ॥

अपस्मार कुष्ठक्ष यार्शः प्रमेह-
-ज्वरोन् माद गुल्मादि रोगा महान्तः ।
पिशाचाश्च सर्वे भवत्पत्र भूतिं
विलोक्य क्षणात्तारकारे द्रवन्ते ॥ २५ ॥

दृशि स्कन्दमूर्तिः श्रुतौ स्कन्द कीर्तिः
मुखे मे पवित्रं सदा तच्चरित्रम् ।
करे तस्य कृत्यं वपुस्तस्य भृत्यं
गुहे सन्तु लीना ममाशेष भावाः ॥ २६ ॥

मुनीना मुताहो नृणां भक्ति भाजाम्
अभीष्ट प्रदाः सन्ति सर्वत्र देवाः ।
नृणामन्त्य जाना मपि स्वार्थ दाने
गुहाद्देव मन्यं न जाने न जाने ॥ २७ ॥

कलत्रं सुता बन्धुवर्गः पशुर्वा
नरो वाथ नारी गृहे ये मदीयाः ।
यजन्तो नमन्तः स्तुवन्तो भवन्तं
स्मरन्तश्च ते सन्तु सर्वे कुमार ॥ २८ ॥

मृगाः पक्षिणो दंशका ये च दुष्टाः
तथा व्याधयो बाधका ये मदङ्गे ।
भवच्छक्ति तीक्ष्णाग्र भिन्नाः सुदूरे
विनश्यन्तु ते चूर्णित क्रौञ्च शैल ॥ २९ ॥

जनित्री पिता च स्वपुत्रा पराधं
सहेते न किं देव सेनाधिनाथ ।
अहं चाति बालो भवान् लोक तातः
क्षमस्वापराधं समस्तं महेश ॥ ३० ॥

नमः केकिने शक्तये चापि तुभ्यं
नमश्छाग तुभ्यं नमः कुक्कुटाय ।
नमः सिन्धवे सिन्धु देशाय तुभ्यं
पुनः स्कन्दमूर्ते नमस्ते नमोऽस्तु ॥ ३१ ॥

जयानन्द भूमन् जयापार धामन्
जयामोघ कीर्ते जयानन्द मूर्ते ।
जयानन्द सिन्धो जयाशेष बन्धो
जयत्वं सदा मुक्तिदानेश सूनो ॥ ३२ ॥

भुजङ्गाख्य वृत्तेन क्लृप्तं स्तवं यः
पठेद् भक्ति युक्तो गुहं सम्प्रणम्य ।
स पुत्रान् कलत्रं धनं दीर्घमायु:
लभेत् स्कन्द सायुज्य मन्ते नरः सः ॥ ३३ ॥

इति श्रीमत् श्रीमच्छङ्कर भगवतः कृतौ श्री सुब्रह्मण्य भुजङ्गम् ॥